# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यः-१ (SEM-2) | **प्रश्नपत्रम् – ४** | गुणाः - ७० |
| विषयः – साहित्यम् (ध्वनिवर्गः) | **CC-4.2.6 (2)** | समयः - ११ तः २ |
| दिनाङ्कः – २१/४/२०१६ | सन्दर्भग्रन्थः – ध्वन्यालोकः तृतीयोद्योतः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **एकस्याः ससन्दर्भं व्याख्या कार्या ।** | ०४ |
| | (१) असमासासमासेन मध्यमेन च भूषिता ।<br>तथा दीर्घसमासेति त्रिधा संघटनोदिता ॥<br>(२) एतद् यथोक्तमौचित्यमेव तस्यः नियामकम् ।<br>सर्वत्र गद्यबन्धेऽपिच्छन्दोनियमवर्जिते ॥ | |
| **प्रश्नः -२** | कविप्रौढोक्तिसिद्धार्थशक्त्युत्थध्वनेः पदवाक्यप्रकाश्यता उदाहरणनिर्देशपूर्वकं प्रदर्शयत ।<br>अथवा<br>काव्यविशेषध्वनेः काव्यस्य च शब्दसन्दर्भात्मकवाक्यविशेषत्वात् कथं तस्य पदप्रकाशत्वम् इति सम्यक् विवेचयत । | ०८ |
| **प्रश्नः -३** | **निम्नेषु त्रयाणां संक्षेपेण उत्तरं लिखत ।** | ०३ |
| | (१) तृतीय उद्योते कति कारिका सन्ति ?<br>(२) तृतीय उद्योते वर्ण्यविषयः कः ?<br>(३) "कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्" कस्योदाहरणम् ?<br>(४) आनन्दवर्धनस्य कति ग्रन्थाः सन्ति ?<br>(५) ध्वनेः आत्मा कः ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **एकस्याः ससन्दर्भं विवेचनं प्रस्तोतव्यम् ।** | ०४ |
| | (१) अलङ्कृतीनां शक्तावप्यानुरुप्येण योजनम् ।<br>प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम् ॥<br>(२) सुप्-तिङ्-वचन-सम्बन्धैस्तथा कारकशक्तिभिः ।<br>कृत्-तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित् ॥ | |
| **प्रश्नः -५** | असंलक्ष्यक्रमव्यङ्गध्वनेः कति प्रकारेण भेदाः प्रदर्श्यन्ते ? कथं वा तस्यैकत्वम् इति संक्षेपेण प्रतिपादय ।<br>अथवा<br>काव्ये सङ्घटनाया नियामकतत्वं प्रतिपाद्य, संघटना निवेशविषये युक्तायुक्तत्वं प्रदर्श्यताम्। | ०८ |
| **प्रश्नः -६** | **त्रयाणाम् एकैकवाक्येन उत्तरं प्रयच्छत् ।** | ०३ |
| | (१) "न्यस्क्कारः" इत्यादौ अतिशयचमत्कारः कथं प्रतीयते ?<br>(२) अनाश्रित्य तिष्ठन्ति संघटना कान् व्यनक्ति ?<br>(३) संघनायाः नियामकः कः ? | |

| | | |
|---|---|---|
| | (४) ध्वन्यालोकानुसारेण प्रकृतरसविरोधिनः कति ?<br>(५) रसभङ्गः कदा भवति ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -७** | **एकस्याः ससन्दर्भं व्याख्या कार्या ।** | ०४ |
| | (१) विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् ।<br>बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला ॥<br>(२) कार्यमेकं यथा व्यापि प्रबन्धस्य विधीयते ।<br>तथा रसस्यापि विधौ विरोधो नैव विद्यते ॥ | |
| **प्रश्नः -८** | रसादिविरोधिनः पदार्थान् उदाहरणप्रदर्शनपूर्वकं विवेचयत ।<br>अथवा<br>विप्रलम्भशृङ्गारप्रसङ्गे मरणोपन्यासः कथं नोचितः ? इति सविशेषं प्रतिपाद्यताम् । | १२ |
| **प्रश्नः -९** | **निम्नाङ्कितेषु द्वयोरुत्तरं लेख्यम् ।** | ०४ |
| | (१) शाब्दबोधजनकव्यापारः कति कानि च ?<br>(२) "न यत्र दुःखं न सुखं न चिन्ता" कस्य रसस्योदाहरणम् ?<br>(३) विरोधिनः कति ? ग्रन्थोक्तदिशा लिखत । | |
| | **चतुर्थान्वितिः - ४** | |
| **प्रश्नः -१०** | **एकस्याः ससन्दर्भं व्याख्या कार्या ।** | ०४ |
| | (१) विनेयानुन्मुखीकर्तुं काव्यशोभार्थमेव वा ।<br>तद्विरुद्धरसस्पर्शतदङ्गानां न दुष्यति ॥<br>(२) प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते ।<br>यत्र व्यङ्ग्यान्वये वाच्य-चारुत्वं स्यात् प्रकर्षयत् । | |
| **प्रश्नः -११** | प्रधानरसस्याङ्गरूपेण समायोजितयोः परस्परविरोधिरसयोः कथमविरोधिता सम्भवतीति प्रतिपाद्यताम् ।<br>अथवा<br>अत्र ह्युपमारुपकाभ्यां शब्दशक्त्युद्भवानुरणनरुपव्यङ्गस्य ध्वनेः संसृष्टत्वम् इत्यस्य ग्रन्थोक्तदिशा विवेचयत । | १२ |
| **प्रश्नः -१२** | **द्वयोः संक्षेपेण उत्तरं लिखत ।** | ०४ |
| | (१) कुत्र गुणभूतव्यङ्गयोः नाम काव्यप्रभेदः प्रकल्पते ?<br>(२) ध्वनिकारमते रीतिनाम् अन्तर्भावः कुत्र भवति ?<br>(३) काक्वाक्षिप्त गुणीभूत व्यङ्ग्यप्रकारं निरूपय । | |

***